यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।

एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ ५.५ ॥

yatsāṅkhyaiḥ prāpyate sthānaṁ tadyogairapi gamyate |
ekaṁ sāṅkhyaṁ ca yogaṁ ca yaḥ paśyati sa paśyati || 5.5||

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।

योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ५.६ ॥

sannyāsastu mahābāho duḥkhamāptumayogataḥ |
yogayukto munirbrahma nacireṇādhigacchati || 5.6||

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।

सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ५.७ ॥

yogayukto viśuddhātmā vijitātmā jitendriyaḥ |
sarvabhūtātmabhūtātmā kurvannapi na lipyate || 5.7||

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।

पश्यञ्श्रुण्वन्स्पृशञ्जिघ्रन्नश्नंगच्छन्स्वपन्श्वसन् ॥ ५.८ ॥

naiva kiñcitkaromīti yukto manyeta tattvavit |
paśyañśruṇvanspṛśañjighrannaśnaṅgacchansvapanśvasan || 5.8||

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।

इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ५.९ ॥

pralapanvisṛjangṛhṇannunmiṣannimiṣannapi |
indriyāṇīndriyārtheṣu vartanta iti dhārayan || 5.9||